**उत्तरम्–** क. **सिंहः मृगस्य** पृष्ठे धावति। ख. **छात्राः** विद्यालयं गच्छन्ति।

ग. **सरोवरे** कमलं विकसति। घ. **शुकाः आकाशे** उत्पतन्ति।

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 15 नीलः श्रृगालः

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. श्रृगालः वने वसति स्म।

ख. रजकस्य गृहे सः एकस्मिन् नीलरसपूणे पात्रे अपतत्।

ग. श्रृगालस्य सुन्दरं वर्णं दृष्ट्वा वचनं च श्रुत्वा पशवः तं नमस्कारं कृतवन्तः। तस्य आदेशेन च वने भ्रमणं भोजनादिकं च कर्तुमारब्धवन्तः।

घ. श्रृगालवृन्दस्य वचनं श्रुत्वा सः अपि उत्थाय उच्चस्वेरण शब्दं कर्तुमारभत।

**2. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

**उत्तरम्–** क. क्षुधापीड़ितः सः कं प्रति अगच्छत्?

ख. केभ्यः भीतः सः वेगेन अधावत्?

ग. कान् दृष्ट्वा सः प्रसन्नः अभवत्?

घ. श्रृगालः वने किं कर्तुम् आरब्धवान्?

ङ. किं श्रुत्वा पशवः आश्चर्यचकिताः अभवन्?

**3. कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं संयोज्य वाक्यानि पूरयत।**

**उत्तरम्–** क. कुक्कुरः **जले** अपतत्।

ख. कुत्रापि **जनानां** कलहः न भवेत्।

ग. बहवो जनाः ग्रामेषु बहवो च **नगरेषु** वसन्ति।

घ. वन्यपशवः **वने** भ्रमन्ति।

ङ. अहं **राजपदे** नियुक्तः अस्मि।

**4. उदाहरणमनुसृत्य वाक्यानुसारम् अन्यं वाक्यं रचयत।**

**उत्तरम्–** क. कुक्कुरः मार्जारं प्रति अधावन्।

ख. लोमशा कस्यचित् रजकस्य गृहं प्राविशत्।

ग. श्रृगालाः अपि अन्यत्र अगच्छन्।

घ. अद्यप्रभृति अहं युष्माकं सेनापति अस्मि।

ङ. एकदा सः सिंहवृन्दस्य कोलाहलम् अश्रृणोत्।

**5. अधोलिखितानि वाक्यानि घटनाक्रमेण लिखत।**

**उत्तरम्–** क. एकस्मिन् वने एकः शृगालः वसति स्म।

ख. नीलरसपात्रे पतनात् सः अकथयत्— ''अहं युष्माकं राजा अस्मि''।

ग. सर्वे सिंहादयः तं नमस्कारं कृतवन्तः।

घ. तेन विस्मृतं यत् सः वस्तुतः शृगालः एव।

ङ. सो—पि उत्थाय उच्चस्वरेण शब्दं कर्तुमारभत।

च. तस्य शब्दं श्रुत्वा वन्यपशवः ज्ञातवन्तः यत् अयं शृगालः एव।

छ. अहो, अनेन शृगालेन वयं वञ्चिताः।

ज. व्याघ्रः तं वञ्चकं शृगालं व्यापादयामास।

**6. निम्नलिखितानां शब्दानाम् उचितं मेलनं कुरुत।**

**उत्तरम्–**




**7. निम्नलिखितानां शब्दानां त्रिषु वचनेषु रूपाणि लिखत।**

**उत्तरम्–**

| | विभक्तिः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| क. | शृगालः (द्वितीया) | = | **शृगालम्** | **शृगालौ** | **शृगालान्** |
| ख. | पशुः (तृतीया) | = | **पशुना** | **पशुभ्याम्** | **पशुभिः** |
| ग. | राजन् (प्रथमा) | = | **राजा** | **राजानौ** | **राजानः** |
| घ. | वनम् (षष्ठी) | = | **वनस्य** | **वनयोः** | **वनानाम्** |
| ङ. | सुन्दरम् (सप्तमी) | = | **सुन्दरे** | **सुन्दरयोः** | **सुन्दरेषु** |
| च. | शब्दः (चतुर्थी) | = | **शब्दाय** | **शब्दाभ्याम्** | **शब्देभ्यः** |

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 16 सन्मित्रम्

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मित्रं मनसि वचसि च शुद्धं भवति।

ख. त्याग भावः, सुख दुःखयो समत्वम्, प्रेमः, सहानुभूतिः, सत्यम्, परहित सम्पादनम्, विश्वासः इत्येते मित्रस्य दिव्यागुणाः भवन्ति।

ग. पङ्गु अन्धयोः मैत्री कथा प्रसिद्धा।

घ. एकदा ग्रामे अग्निकाण्डः अभवत्।

**2. एकस्मिन् शब्दे उत्तरत लिखित।**

**उत्तरम्–** क. उद्यानम्। ख. मित्राणि। ग. सुदाम्नः। घ. श्रीरामः।

**3. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अहं उद्यानं गन्तुम् इच्छामि। ख. तत्र मम मित्रम् अस्ति।

ग. सुदामा श्रीकृष्णश्च मित्रे आस्ताम्।

घ. अहं चलितुं समर्थः अस्मि त्वं च द्रष्टुं समर्थः असि।

ङ. तदा तौ उपायम् अचिन्तयताम्। च. एषा कथा तु अतिरुचिकरा अस्ति।

**4. धातुं प्रत्ययं च योजयत।**

**उत्तरम्–**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| हस् | + | तुमुन् | = | **हसितुम्** | कृ | + | तुमुन् | = | **कर्तुम** |
| पा | + | तुमुन् | = | **पातुम** | प्रच्छ् | + | तुमुन् | = | **प्रष्टुम** |
| खाद् | + | तुमुन् | = | **खादितुम्** | दृश् | + | तुमुन् | = | **द्रष्टुम्** |

**5. निम्नलिखितानां शब्दानां मूलपदानां, विभक्तिं वचनं च लिखत।**

**उत्तरम्–**

| | **शब्दः** | | **मूलशब्दः** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|---|---|
| क. | मित्रतायाः | = | **मित्रम्** | **पञ्चमी/षष्ठी** | **एकवचनम्** |
| ख. | गुणान् | = | **गुणः** | **द्वितीया** | **बहुवचनम्** |
| ग. | ग्रामात् | = | **ग्रामः** | **पञ्चमी** | **एकवचनम्** |
| घ. | मित्रे | = | **मित्रम्** | **सप्तमी** | **एकवचनम्** |

**6. निम्नलिखितानि वाक्यानि लोट्लकारे परिवर्तयत।**

**उत्तरम्–** क. अर्पणः उद्यानं गच्छतु। ख. भवान् रामेण सह वदतु।

ग. त्वं कथां कथय। घ. अहं ग्रामं गच्छानि।

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 17 भोजनं शरीररक्षकम्

## *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. शरीरम् अन्नमयः कोशः कथ्यते।

ख. चणकः, तण्डुलम् गोधूमः, द्विदलम्, यवः, मुद्गः, माषः इत्यादिकम् अन्नंभोजनम् अस्ति।

ग. भोजनशास्त्रनिष्कर्षे उक्तं यत् शाकाहारी मनुष्यः दीर्घायुः भवति। मांसाहारिणः जीवनम् अल्पतरम्।

घ. ओदनः द्विदलं रोटिका च भारतस्य मुख्यं भोजनम्।

ङ. हितभुक् मितभुक् शाकभुक्–भोजनशास्त्राणां सर्वानुसन्धान निष्कर्षः इति वचनम् आजीवनं पालनीयम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. शरीरम् **अन्नमयकोशः** कथ्यते।
ख. शाकाहारी मनुष्यः **दीर्घायुः भवति**।
ग. बहुश नागरिकाः **रोटिकाः** खादन्ति।
घ. मधु **रक्तशोधकम्** उच्यते।
ङ. स्वस्थे नीरोगे **अकुण्ठितं मस्तिष्कं** तिष्ठति।
च. **धर्मार्थ** काममोक्षाणाम् आरोग्यं मूलम् उत्तमम्।

**3. सम्यक् कथने ( ✓ ) इति चिह्नं नियोजयत।**

**उत्तरम्–** क. (✗) ख. (✓) ग. (✗) घ. (✓)
ङ. (✓) च. (✓) छ. (✓)

**4. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–**

| | | | | |
|---|---|---|---|---|
| उक्तञ्च | = | **उक्तं** | + | **च** |
| नगराञ्चले | = | **नगर** | + | **अञ्चले** |
| अवश्यमेव | = | **अवश्यम्** | + | **एव** |
| सदैव | = | **सदा** | + | **एव** |
| तक्रादिकम् | = | **तक्र** | + | **आदिकम्** |
| शरीरमाद्यम् | = | **शरीरम्** | + | **आद्यम्** |

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. नवीनतम्, दुग्धम्, तक्रम, घृतम् इत्यादिकं पेयम् अस्ति।
ख. मांसाहारः मनुष्याय उत्तम भोजनं नास्ति।
ग. मद्यपानं शरीरं नाशयति।
घ. रोगरहिते मस्तिष्के सुमेधाः मेधा सदविचाराः च आयान्ति।
ङ बालाः मिष्टान्नानि प्रेम्णा खादन्ति।
च. बालेभ्यः दुग्धम् अमृतं मन्यते।
छ. रात्रौ दधि न भोक्तव्यम्।

**6. निम्नलिखितानां पदानां विभक्तिम्, वचनं लिङ्गञ्च लिखत।**

**उत्तरम्–**

| | पदम् | | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| क. | शरीर | = | **प्रथमा** | **एकवचनम्** | **नपुंसकलिङ्गम्** |
| ख. | मनुष्यैः | = | **तृतीया** | **बहुवचनम्** | **पुंल्लिङ्गम्** |
| ग. | रोटिकाः | = | **प्रथमा** | **बहुवचनम्** | **स्त्रीलिङ्गम्** |
| घ. | स्फूर्तिम् | = | **द्वितीया** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| ङ. | मेधा | = | **प्रथमा** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| च. | औषधम् | = | **प्रथमा** | **एकवचनम्** | **नुपंसकलिङ्गम्** |

**7. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. शरीर अन्न से निर्मित कहलाता है।
ख. यह सब शाकाहारी मनुष्यों का भोजन है।

ग. शाकाहारी मनुष्य दीर्घायु होता है।
घ. मांसाहारियों का जीवन बहुत कम होता है।
ङ. बच्चे मिठाई रुचिपूर्वक खाते हैं।
च. हे इंद्र! तुम मुझे मेधा (बुद्धि) से युक्त करो।
छ. शहद रक्तशोधक कहलाता है।

**8. निम्नलिखितेषु वाक्येषु आगतानि क्रियापदानि रेखाङ्कितानि कुरुत।**

**उत्तरम्–** क. शरीरम् अन्नमय: कोश: **कथ्यते**।
ख. शाकाहार: निरामिष: एवं मनुष्यै: **भोक्तव्य**:।
ग. सर्वविधं व्यञ्जनं भारते विशेषत: उत्तरभारते अधिकं **प्रचलितम्**।
घ. कश्चित् शष्कुली खादितुम् अधिकम् **इच्छति**।
ङ. अत्र मिष्टान्नमपि **विक्रीयते**।

**क्रियाकलाप:**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 18 सूक्तय:

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानां उत्तराणि लिखत।**

**उत्तरम्–** क. अविवेक: परमापदां पदम् अस्ति। ख. श्रद्धावान् ज्ञानं लभते।
ग. सर्वत्र विद्वान् पूज्यते। घ. लोभ: पापस्य कारणम् अस्ति।
ङ. अनर्था: छिद्रेषु बहुली भवन्ति।

**2. अर्थम् लिखत।**

**उत्तरम्–** क. थोड़ी (अधकचरी) विद्या भयानक है।
ख. समय को बर्बाद करने पर विद्या कहाँ?
ग. लालच पाप का कारण है।
घ. विवेकहीनता घोर आपदाओं की जननी है।

**3. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. विदुष: सर्वत्र पूजां भवति। ख. अल्पविद्या भयङ्करी भवति।
ग. सन्तोष एव परमं धनम्। घ. अस्माकम् आचरणम् साधु स्यात्।
ङ. श्रद्धावान् ज्ञानं प्राप्नोति। च. समय: अमूल्य: अस्ति।

**4. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. आचरण सबसे बड़ा धर्म है।
ख. अच्छाई-बुराई संगति से उत्पन्न होती है।
ग. श्रद्धालु ज्ञान पाता है।
घ. त्रुटियों से मुसीबतें बढ़ जाती है।

**5. प्रदत्तानां पदानाम् अर्थं लिखत वाक्यानि च रचयत।**

**उत्तरम्–** क. कारणम् = **कारण** — लोभ: पापस्य **कारणम्**।

| | | | | | |
|---|---|---|---|---|---|
| ख. | कुतः | = | **कहाँ** | — | अलसाय विद्या **कुतः**। |
| ग. | भुज्यते | = | **भोगा जाता है** | — | यथा क्रियते तथा **भुज्यते**। |
| घ. | सर्वत्र | = | **सब जगह** | — | विद्वान् **सर्वत्र** पूज्यते। |
| ङ. | लभते | = | **पाता है।** | — | श्रद्धावान् ज्ञानं **लभते**। |

**6. निम्नलिखितानां पदानां स्व वाक्येषु प्रयोगं कुरुत।**

**उत्तरम्–** क. संसर्गजा = **संसर्गजा** दोष गुणाः **भवन्ति**।

ख. पदम् = अविवेकः परमापदां **पदम्**।

ग. छिद्रेषु = **छिद्रेषु** अनर्थाः भवन्ति।

घ. श्रद्धावान् = **श्रद्धावान्** ज्ञानं लभते।

ङ सर्वत्र = ईश्वरः **सर्वत्र** अस्ति।

**7. पदानाम् उचितं मेलन कुरूत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | विद्वान् | (i) | तथा भुज्यते |
| ख. | आचारः | (ii) | भयङ्करी |
| ग. | यथा क्रियते | (iii) | कुतो विद्या |
| घ. | अल्पविद्या | (iv) | सर्वत्र पूज्यते |
| ङ. | क्षणत्यागे | (v) | परमो धर्मः |

(क → iv, ख → v, ग → i, घ → ii, ङ → iii)

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 19 मूर्खः भृत्यः

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. भृत्यः आज्ञाकारी परं मूर्खः आसीत्।

ख. धनिकस्य पुत्रः भृत्यं बिडालशावकम् आनेतुम् आदिशति।

ग. भृत्यः दुग्धं पात्रं दोरकेण बद्ध्वा कर्षित्वा च आनयति।

घ. धनिकः निराशो भूय वदति यत् भो महापण्डित, दूरम् अपसर, कृष्णं भवतु ते मुखम्।

ङ. भृत्यः मुखं कज्जलेन लिम्पति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. तस्य एकः **आज्ञाकारी** परं **मूर्खः** भृत्यः आसीत्।

ख. धनिकः तं **लवणम्** आनेतुम् आदिशत्।

ग. भविष्ये वस्तूनि **मञ्जूषायाम्** एवम् आनेतव्यानि।

घ. **कृष्णं** भवतु ते मुखम्।

ङ. धनिकः **स्वभालं** हस्तेन ताडयति।

**3. निम्नलिखितानि वाक्यानि संस्कृते लिखत।**

**उत्तरम्–** क. कस्यचित् धनिकस्य एकः मूर्खः भृत्यः आसीत्।

ख. सः भृत्यः स्व स्वामिनः आज्ञाः पालनं करोति स्म।
ग. धनिक तं हटटात् लवणमानेतुं अकथयत्।
घ. धनिकः तम् अबोधयत् यत् लवणे पात्रे स्थापयित्वा आनेतव्यम्।
ङ. भृत्यः स्वमुखं कृष्णं कृत्वा धनिक समक्षम् उपस्थितः अभवत्।

**4. निम्नलिखितानां शब्दानां विभक्तिम्, वचनं लिङ्गञ्च लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | दोरकेण | = | **तृतीया** | **एकवचनम्** | **नपुंसकलिङ्गम्** |
| ख. | धनिकस्य | = | **षष्ठी** | **एकवचनम्** | **पुंल्लिङ्गम्** |
| ग. | आपणात् | = | **पञ्चमी** | **एकवचनम्** | **नपुंसकलिङ्गम्** |
| घ. | लवणम् | = | **प्रथमा** | **एकवचनम्** | **नपुंसकलिङ्गम्** |
| ङ. | मञ्जूषायाम् | = | **सप्तमी** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| च. | भृत्याय | = | **चतुर्थी** | **एकवचनम्** | **पुंल्लिङ्गम्** |

**5. मञ्जूषायाः सम्यक् अव्ययप्रयोगं कुरुत।**

**उत्तरम्–** क. **कस्मिंश्चित्** देशे एकः नृपः आसीत्।
ख. ते अपठन् **परम्** उत्तीर्णाः न अभवन्।
ग. **कदापि** असत्यं मा वद।
घ. **यथा** परिश्रमं **तथा** फलम्।
ङ. सत्यम् **एव** जयते।
च. सः विद्यालयात् **बहिः** गच्छति।

**6. निर्देशानुसारं लकारपरिवर्तनं कुरुत।**

**उत्तरम्–** क. भृत्यः लवणम् आनेतुं गमिष्यति।
ख. सः भृत्यम् आदिशत्।
ग. सः मूर्खः भविष्यति।
घ. पशून् दोरकेण बद्ध्वा आनयतु।
ङ. त्वं दुग्धम् आनयसि।

**7. विपरीतार्थानां शब्दानां परस्परं मेलनं कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | लवणम् | i. | निकटम् |
| ख. | मूर्खः | ii. | नूतनवस्त्रम् |
| ग. | धनिकः | iii. | पण्डितः |
| घ. | भृत्यः | iv. | शीतलम् |
| ङ. | जीर्णवस्त्रम् | v. | निर्धनः |
| च. | उष्णम् | vi. | स्वामी |
| छ. | दूरम् | vii. | मधुरम् |

**8. सन्धिं कुरुत।**

**उत्तरम्–**

| | | | | |
|---|---|---|---|---|
| तथा | + | एव | = | **तथैव** |
| कदा | + | अपि | = | **कदापि** |
| अत्र | + | अन्तरे | = | **अत्रान्तरे** |
| सम् | + | लिप्य | = | **संलिप्य** |
| प्रति | + | आगच्छति | = | **प्रत्यागच्छति** |
| यदि | + | अपि | = | **यद्यपि** |
| प्रति | + | एक | = | **प्रत्येक** |

**9. निम्नलिखितानां शब्दानां वाक्य रचना संस्कृते कुरुत।**

**उत्तरम्–** भृत्य: = **भृत्य:** लवणम् आनेतुम् आपणम् अगच्छत्।

धनिक: = एकदा **धनिक:** भृत्यं लवणम् आनेतुम् आदिशत्।

बुद्धिप्रयोगं = धनिकस्य भृत्य: **बुद्धिप्रयोगं** कदापि करोति स्म:।

मञ्जूषा = **मञ्जूषा:** शब्दानि चित्वा वाक्यानि पूरयत।

अपसर = निराश: भूत्वा धनिक: भृत्यं अवदत्यत् दूरम् **अपसर**।

**क्रियाकलाप:**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 20 गुरुभक्त:

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. आरुणि: महर्षे: धौम्यस्य आश्रमे अधीते स्म।

ख. गुरु: आरुणिं केदारखण्डं रक्षितुम आदिशत्।

ग. आरुणे: स्वयमेव केदारखण्डे शयिते जलस्य प्रवाहोरुद्धोऽभवत्।

घ. गुरु अवदत् यत् — ''वत्स! त्वं मम अभूतपूर्व: शिष्य:। कल्याणं ते भवतु। सर्वे वेदा: सर्वाणि शास्त्राणि च तव प्रतिभान्तु। अयं हि मम आशीर्वाद:।''

ङ. आरुणि: गुरो: प्रसादेन अल्पेनैव कालेन सर्वा: विद्या: अशिक्षत्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. पुरा एक: **धौम्य:** नामक: महर्षि: आसीत्।

ख. तत्र सर्वान् जलमार्गान् **मृत्तिकया** अबद्धनात्।

ग. मृत्तिका जलस्य वेगेन **तत्र स्थातुं न** अशक्नोत्।

घ. ततो जलस्य **प्रवाह:** अवरुद्धोऽभत्।

ङ. सर्वे वेदा: सर्वाणि **शास्त्राणि** च तव प्रतिभान्तु।

**3. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. महर्षि: | = | **महा + ऋषि:** | ख. विद्यार्थी | = | **विद्या + अर्थी** |
| ग. स्वयमेव | = | **स्वयम् + एव** | घ. संस्थित: | = | **सम् + स्थित:** |
| ङ. आशीर्वाद: | = | **आशी: + वाद:** | च. प्रत्यवदत् | = | **प्रति + अवदत्** |
| छ. अल्पेनैव | = | **अल्पेन + एव** | | | |

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. पुरा धौम्य: नामक: ऋषि: आसीत्।

ख. तस्य आश्रमे बहव: विद्यार्थिन: अध्ययनं कुर्वन्ति स्म।

ग. तेषु एक: आरुणि नामक: शिष्य: अपि आसीत्।

घ. महर्षि: आरुणि केदारखण्डं बद्धुम् अप्रेषयत्।

ङ. मृत्तिकया जलवेगम् आरुणि: रोद्धुं न अशक्नोत।

च. गुरो: कृपया आरुणि सर्वा: विद्या: अप्राप्नोत्।

**5. हिन्द्याम् अनुवादं कुरुत।**

**उत्तरम्–** क. तब आरुणि स्वयं ही वहाँ लेट गया।

ख. उसके बाद जल का प्रवाह रुक गया।

ग. वैसे रहते हुए वह दिन बीत गया।

घ. तो हम सभी वहाँ जाते हैं जहाँ वह आरुणि गया।

ङ. आवाज सुनकर आरुणि मेंड से उठकर गुरु के सामने उपस्थित हुआ।

च. वत्स! तुम मेरे अभूतपूर्व शिष्य हो। तुम्हारा कल्याण हो।

**6. सम्यक् कथने ( ✓ ) इत्यस्य चिह्नं नियोजयत।**

**उत्तरम्–** क. (✗) ख. (✗) ग. (✗) घ. (✓) ङ. (✓)

**7. निम्नलिखितानां शब्दानां विभक्तिं वचनञ्च लिखत।**

**उत्तरम्–**

| | शब्दः | | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क. | सर्वान् | = | **द्वितीया** | **बहुवचनम्** |
| ख. | जलस्य | = | **षष्ठी** | **एकवचनम्** |
| ग. | सर्वाणि | = | **प्रथमा** | **बहुवचनम्** |
| घ. | प्रसादेन | = | **तृतीया** | **एकवचनम्** |
| ङ. | अस्मि | = | **तृतीया** | **एकवचनम्** |

**8. तालिकां पूरयत।**

**उत्तरम्–**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | **तौ** | ते |
| द्वितीया | **तम्** | तौ | **तान्** |
| तृतीया | तेन | **ताभ्याम्** | तैः |
| चतुर्थी | **तस्मै** | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | **ताभ्याम्** | **तेभ्यः** |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | **तस्मिन्** | तयोः | **तेषु** |

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 21 व्याकरणम्

विद्यार्थी स्वयं करें।

# 1 विश्वबंधुत्व

## *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. विश्व सर्वान् जनान् प्रति बंधुत्वस्य भावः एव विश्वबन्धुत्वम् इति कथ्यते।

ख. विश्वबंधुत्वम् एव दृष्टौ निधाय केनापि मनीषिणः निर्दिष्टम्—
अयं निजः परोवेति गणना लघुचेतसाम्
उदारचरितानां तु वसुधैव कुटुंबकम्।।

ग. विगतयोः द्वयोः विश्वयुद्धयोः विनाशलीलां सर्वे जानन्ति।

घ. सर्वेषु मानवेषु समानं रक्तं प्रवहति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. भावनैषा **अपरिहार्या** आवश्यकता।

ख. अस्य प्रधान कारणं **विश्वबंधुत्वस्य** अभावः एव।

ग. विगतयोः द्वयोः **विश्वयुद्धयोः** विनाशीलां सर्वे जानन्ति एव।

घ. एकः देशः अन्येन देशेन सह **बंधुतायाः** व्यवहारं कुर्यात्।

ङ. संसारे सर्वेषु जनेषु समानं **रक्तं** प्रवहति।

च. सर्वत्र **प्रेम्णः** बंधुत्वस्य च अभावो वर्तते।

**3. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. जनान् प्रति बंधुत्वस्य भावः एव विश्वबंधुत्वं कथ्यते।

ख. एषा भावना अपरिहार्या आवश्यकता वर्तते।

ग. सर्वत्र प्रेम्णः बंधुत्वस्य च अभावो वर्तते।

घ. मानवः चन्द्रा दिग्रहेषु गंतुं समर्थः अस्ति।

ङ. जीवने शान्ति दुर्लभा जाता।

**4. निम्नलिखितानां पदानां वचनम् विभक्तिं च लिखत।**

**उत्तरम्–**

| | शब्द रूप | वचन | विभक्ति |
|---|---|---|---|
| क. | बंधुत्वस्य | **एकवचनम्** | **षष्ठी** |
| ख. | ग्रहेषु | **बहुवचनम्** | **सप्तमी** |
| ग. | अखिले | **एकवचनम्** | **सप्तमी** |
| घ. | देशानाम् | **बहुवचनम्** | **षष्ठी** |
| ङ. | याभ्याम् | **द्विवचनम्** | **चतुर्थी/पञ्चमी** |
| च. | व्यवहारम् | **एकवचनम्** | **द्वितीया** |

**5. निम्नलिखितानां शब्दानां वाक्य-प्रयोगं कुरुत।**

**उत्तरम्–** क. विश्वस्य — **विश्वस्य** आदि ग्रन्थाः चत्वारः वेदाः संस्कृत भाषायाम् एव सन्ति।

ख. साम्राज्यम् — अखिले विश्वे अशान्तेः **साम्राज्यं** व्याप्तम् अस्ति।

ग. दुर्बलानाम् — व्यायामेन **दुर्बलानाम्** शरीरं नीरोगं भवति।

घ. परस्परम् — जना: **परस्परं** कलहं न कुर्यु:।

ङ. देशा: — सबल **देशा:** दुर्बलानां देशानाम् उपरि आक्रमणं न कुर्यु:।

च. शांति — जीवने प्रेम्ण: विना **शान्ति:** सुलभा न जाता।

**6. निम्नलिखितान् शब्दान् मेलयत।**

**उत्तरम्–**

| | |
|---|---|
| क. बंधुत्वस्य भाव: | (i) आकाशे |
| ख. निज: परोवेति गणना | (ii) संतर्तुम् |
| ग. वसुधैव कुटुंबकेन | (iii) विश्वबंधुत्वम् |
| घ. वायुयानेन | (iv) लघुचेतसाम् |
| ङ. जलपोतेन | (v) उदारचरितानाम् |

**7. सम्यक कथने ( ✓ ) चिह्नं नियोजयत।**

**उत्तरम्–** क. (✓) ख. (✗) ग. (✗) घ. (✗) ङ. (✓)

**8. हिन्द्यांअनुवादं कुरुत।**

**उत्तरम्–** क. सभी लोगों का हित और सभी लोगों का सुख भाईचारे के बिना संभव नहीं है।

ख. ऐसी भावना निश्चित रूप से आवश्यक है।

ग. संसार में कलह और अशांति का साम्राज्य फैला हुआ है।

घ. मनुष्य के प्रति भाईचारे का आचरण करना चाहिए।

ङ. एक देश दूसरे देश के साथ भाईचारे का व्यवहार करे।

**क्रियाकलाप:**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 2 विद्यार्थीजीवनम्

## *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. कस्यापि जनस्य जीवनयात्राया: निर्वाहनिर्धारणं तस्य विद्यार्थी जीवने एव भवति। तदा स: यादृशं वृंत समुपचिनोति तेनैव जीवन यात्राया: निर्वाह–निर्धारणं भवति।

ख. सर्वाणि सुखानि विहाय विद्याध्ययनमेव छात्रस्य कर्तव्यं स्यात्।

ग. आत्मविश्वास: विद्यार्थिन: जीवनस्य मुख्य: उद्देश्य: अस्ति।

घ. काकवत् चेष्टा बकवत् ध्यानम् श्वानवत्, निद्रा, अल्पहारं, गृहत्यागं चेति विद्यार्थिन: पञ्चलक्षणानि सन्ति।

ङ. ब्रह्मचर्यपालनं सर्वश्रेयस्करं विद्यार्थिनां कृते।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. छात्र जीवनं **मानवजीवनस्य स्वर्ण**–कालम् अस्ति।

ख. **विद्याध्ययनं** विद्यार्थीजीवनस्य प्रथमं कर्तव्यम् अस्ति।

ग. समयस्य **दुरुपयोग:** कदापि न करणीय:।

घ. विद्यार्थी सदैव **काकवत्** चेष्टां कुर्यात्।

ङ. विद्यार्थिना **स्वल्पाहारः** एव करणीयः।

**3. हिन्द्यां अनुवादं कुरुत।**

**उत्तरम्–** क. विद्या के अध्ययन का काल ही तपस्या का काल है।

ख. विद्या का अध्ययन ही छात्र का कर्तव्य होना चाहिए।

ग. गुरुओं की सेवा उनका परम कर्तव्य है।

ङ. आत्मविश्वास विद्यार्थी के जीवन का मुख्य उद्देश्य है।

च. विद्यार्थी हमेशा कौए की तरह चेष्टा करे।

**4. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | यतश्च | = | **यतः** | + | **च** |
| ख. | तेनैव | = | **तेन** | + | **एव** |
| ग. | तथैव | = | **तथा** | + | **एव** |
| घ. | दुरुपयोग: | = | **दुः** | + | **उपयोग** |
| ङ. | परमोन्नतिम् | = | **परम** | + | **उन्नतिम्** |

**5. विपरीतार्थकान् शब्दान् लिखत।**

**उत्तरम्–**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| निर्माणम् | = | **विनाशः** | उन्नतिम् | = | **अवनतिः** | प्रथमम् | = | **अन्त्य** |
| सुखानि | = | **दुःखानि** | सदुपयोग: | = | **दुरुपयोगः** | ज्ञानम् | = | **अज्ञानम्** |
| गुरु: | = | **शिष्यः** | अल्पम् | = | **दीर्घम्** | मुख्य: | = | **गौणः** |
| मानम् | = | **अपमानम्** | | | | | | |

**6. निम्नलिखितानां शब्दानां वाक्य-प्रयोगं कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | यादृशम् | = | छात्रः अस्मिन् काले **यादृशम्** वृतं समुपचिनोति, तेनैव सः स्व जीवनयात्राया निर्वाहं करोति। |
| ख. | सदैव | = | **सदैव** सत्यं वद। |
| ग. | सेवा | = | गुरुणां **सेवा** छात्राणां परम कर्तव्यं वतर्ते। |
| घ. | आलस्यम् | = | **आलस्यम्** कदापि न कर्तव्यम्। |
| ङ. | कदापि | = | समयस्य दुरुपयोग: **कदापि** न करणीयः। |

**7. बहुवचने परिवर्तयत।**

**उत्तरम्–**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अस्मिन् | = | **एषु** | काले | = | **कालेषु** | जीवनस्य | = | **जीवनानाम्** |
| नियमम् | = | **नियमान्** | गुरुणा | = | **गुरुभिः** | सुखम् | = | **सुखानि** |
| छात्रात् | = | **छात्रेभ्यः** | याचकाय | = | **याचकेभ्यः** | तस्मात् | = | **तेभ्यः** |
| हे रमा! | = | **हे रमाः!** | | | | | | |

**8. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. विद्यार्थी जीवनं मानव जीवनस्य स्वर्णकालम् अस्ति।

ख. विद्याध्ययनं विद्यार्थी जीवनस्य प्रथमं कर्तव्यम् अस्ति।

ग. विद्याध्ययन काल: एव तपस्याकाल: वर्तते।

घ. गुरूणाम् आज्ञापालनं तेशां परमं कर्तव्यं वर्तते।

ङ. समयस्य दुरुपयोग: कदापि न करणीय।

च. विद्यार्थिना स्वल्याहारः एव करणीयः।

**9. क्रियापदानि रेखाङ्कितानि कुरुत लिखत च।**

| | | |
|---|---|---|
| **उत्तरम्–** | क. विद्याध्ययनकाले परिश्रमेण पठित्वा स्व लक्ष्यं प्राप्नुत। | **पठित्वा, प्राप्नुत** |
| | ख. सर्वदा गुरोः आज्ञां मत्वां अध्ययनं कुरुत। | **मत्वा, कुरुत** |
| | ग. कदापि समयस्य दुरुपयोगः न करणीयः। | **करणीयः** |
| | घ. स्व कर्तव्यं पालयन एवं विद्यार्थी उन्नतिं प्राप्नोति। | **पालयन, प्राप्नोति** |
| | ङ. सः स्व जीवन यात्रायाः निर्वाहं करोति। | **करोति** |

**10. निम्नलिखितानां पदानां वचनम् विभक्तिं च लिखत।**

| **उत्तरम्–** | **पदानां** | **वचन** | **विभक्ति** |
|---|---|---|---|
| | क. मानवजीवस्य | **एकवचनम्** | **षष्ठी** |
| | ख. जीवनयात्रायाः | **एकवचनम्** | **पञ्चमी/षष्ठी** |
| | ग. अनुशासने | **एकवचनम्** | **सप्तमी** |
| | घ. गुरूणां | **एकवचनम्** | **तृतीया** |
| | घ. आत्मविकासाय | **एकवचनम्** | **चतुर्थी** |

**11. निम्नलिखितानां शब्दान् मेलयन।**

| | | | |
|---|---|---|---|
| **उत्तरम्–** | क. विद्यार्थी जीवनम् | (i) | तपस्याकालः |
| | ख. विद्याध्ययनम् | (ii) | स्वर्णकालम् |
| | ग. वकः | (iii) | निद्रा |
| | घ. श्वान | (iv) | ध्यानः |
| | ङ. अल्पः | (v) | चेष्टा |
| | च. काकवत् | (vi) | आहारी |

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 3 जगतगुरुः शङ्कराचार्यः

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानां उत्तराणि लिखत।**

**उत्तरम्–** क. केरले कालडी नामकः ग्रामः अस्ति।

ख. शङ्करस्य पिता बाल्ये एवं दिवंगतः।

ग. सः गोविन्द पदाचार्येभ्यः संन्यासं गृहीतवान्।

घ. माता स्व पुत्रं मकरेण गृहीतम् अपश्यत्।

ङ. शङ्कराचार्यस्य 'भज गोविन्दं' इति गीतं प्रसिद्धम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. शङ्करस्य **बाल्ये** एव पिता **दिवंगतः**।

ख. माता पुत्रस्य **प्रार्थनां** न स्वीकृतवती।

ग. यथा तुभ्यं **रोचते** तथा **कुरु**।

घ. अत्रान्तरे बहवः **जनाः** तस्य **शिष्याः** अभवन्।

ङ. एवञ्च सः **द्वात्रिंशे वयसि** ब्रह्मभावम् उपगतः।

**3. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. शङ्कराचार्य माता आर्याम्बा पिता च शिवगुरुः आस्ताम्।

ख. स्नानाय नदीं गतः शङ्कराचार्य मकरः गृहीतवान्।

ग. बहवः जनाः शङ्कराचार्यस्य शिष्याः अभवन्।

घ. शङ्कराचार्यः चत्वारः मठान् स्थापयत्।

ङ. शङ्कराचार्यस्य मृत्यु द्वात्रिंरो वयसि अभवत्।

**4. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. शङ्कराचार्य के बचपन में ही पिता स्वर्गवासी हो गये थे।

ख. शङ्कराचार्य की माता इनका विवाह करना चाहती थीं।

ग. नदी के जल में मगरमच्छ द्वारा शङ्कर का पैर पकड़ा गया।

घ. शङ्कराचार्यस्य का 'भज गोविन्दम' गीत बहुत प्रसिद्ध है।

ङ. बत्तीसे वर्ष में शङ्कराचार्य ब्रह्मभाव में लीन हो गए।

**5. सन्धिं कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | जन्मन | + | एव | = | **जन्मनैव** |
| ख. | कुलः | + | उचिताः | = | **कुलोचिताः** |
| ग. | तम् | + | अनुगृहीतवती | = | **तमनुगृहीवती** |
| घ. | निः | + | अगच्छत् | = | **निर्गच्छति** |
| ङ. | पुनः | + | अपि | = | **पुनरपि** |

**6. निम्नलिखितानां शब्दानां वाक्य-प्रयोगं कुरुत।**

**उत्तरम्–** क. दिवंगतः = शङ्कराचार्यस्य पिता बाल्ये एवं **दिवंगतः**।

ख. अधीतवान् = शङ्कराचार्यः कुलोचिताः विद्या शीघ्रमेव **अधीतवान्**।

ग. प्रयच्छ = शङ्करः मातरमवदत् अम्बा संन्यासग्रहणाय अनुमतिं **प्रयच्छ**।

घ. परीक्षणाय = अद्वैत सिद्धान्तरस्य **परीक्षणाय** श्रीशङ्करः चत्वारः मठान् स्थापयत्।

ङ. पाहि = इह संसारे **पाहि** मुरारे।

**7. निम्नलिखितानां श्लोकार्थम् लिखत।**

**उत्तरम्–** हे मूढ़मति! गोविंद (ईश्वर) को भज, गोविंद को भज, गोविंद को भज। दिन, रात, सायं प्रातः, शिशिर और वसंत फिर आते हैं। समय खेलता है, आयु जा रही है, फिर भी मनुष्य जीने की आशा नहीं छोड़ता है। हे मूढ़मति! गोविंद को भजो।

**8. विपरीतार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ग्रामे | = | **नगरे** | जन्म | = | **मृत्यु** | समीपे | = | **दूरे** |
| विद्या | = | **अविद्या** | यथा | = | **तथा** | प्रातः | = | **सायम्** |
| उच्चैः | = | **नीचैः** | देशं | = | **विदेशं** | जननं | = | **मरणम्** |
| रोचते | = | **अरुचिः** | कष्टेन | = | **सुखेन** | शिष्या | = | **गुरूः** |

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 4 अपूर्वः त्यागः

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. पन्ना बालनृपस्य उदयसिंहस्य धात्री आसीत्।

ख. उदयः शिशुः आसीत् अतः राजपूतप्रमुखैः एकं दूरस्थं सम्बन्धिनं बनवीरं तस्य संरक्षकः नियुक्तम्।

ग. बनवीरात् उदयं रक्षितुं पन्ना तं प्रासादात् बहिः अप्रेषयत्।

घ. युवा भूत्वा उदयः बनवीरं युद्धे निहत्य चित्तौडदेशस्य राजा अभवत्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. महाराणा **सङ्ग्रामसिंहः** देवलोकम् अगच्छत्।

ख. तस्य इदं **घृणितं** विचारं **पन्नाधात्र्या** ज्ञातम्।

ग. तस्याः स्वपुत्रः **चन्दनः** अपि समवयसः **आसीत्**।

घ. तर्हि अहं **निष्कण्टकं** राज्यं **करिष्यामि**।

ङ. सः एव **'उदयपुर'** नगरम् **अस्थापयत्**।

**3. हिन्द्यांनुवादं कुरुत।**

**उत्तरम्–** क. महाराणा संग्रामसिंह देवलोक (मृत्य) को प्राप्त हो गये।

ख. पुत्र उदयसिंह अभी बच्चा ही था।

ग. बालक राजा का पोषण पन्ना नाम की एक धाय कर रही थी।

घ. रक्त के प्यासे बनवीर ने पूछा।

ङ. धन्य है ऐसी स्वामी भक्ति, यह अपूर्व त्याग।

**4. घटनाक्रमानुसारं वाक्यानि लिखत।**

**उत्तरम्–** क. राणा सङ्ग्रामसिंहस्य स्वर्गवासः अभवत्।

ख. तस्य शिशु पुत्रः उदयसिंहः राज्ञः पदे अभिषिक्तः।

ग. राज्यस्य कृते बनवीरः उदयम् हन्तुम् ऐच्छत्।

घ. पन्ना स्वपुत्रम् उदयस्य स्थाने अस्थापयत्।

ङ. चन्दनः हतः उदयः च सुरक्षितः निर्गतः।

च. धन्यः पन्नाधात्र्याः अनुपमः त्यागः।

**5. उचितैः धातुरूपैः रिक्तस्थानं पूरयत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | लट् | कृ | **करोति** | कुरुतः | कुर्वन्ति |
| ख. | लृट् | स्था | स्थास्यति | **स्थास्यतः** | **स्थास्यन्ति** |
| ग. | लङ् | अस् | आसीत् | **आस्ताम्** | **आसन्** |
| घ. | लोट् | गम् | **गच्छतु** | **गच्छताम्** | गच्छन्तु |
| ङ. | विधिलिङ् | भू | **भवेत्** | भवेताम् | **भवेयुः** |

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. महाराणा सङ्ग्रामसिंहः देवलोकम् अगच्छत्।

ख. उदयसिंहः अधुना शिशुः एव आसीत्।

ग. पन्नाधात्र्याः एकः पुत्रः आसीत्।

घ. चित्तौड़ नामकं स्थानं राजस्थान-प्रदेशे अस्ति।

ङ. धन्या इदृशी स्वामिभक्तिः अपूर्वश्च त्यागः।

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 5 अनुशासनस्य महत्त्वम्

## *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. संसारेऽस्मिन् अनुशासनस्य महत्त्वं वर्तते।

ख. विद्याध्ययनकाले अनुशासनस्य साम्राज्यम् अस्ति।

ग. ये छात्राः गुरोः अनुशासने परिश्रमेण विद्यायाः अध्ययनं कुर्वन्ति ते सदा सफलतां प्राप्नुवन्ति।

घ. गृहे, विद्यालये, सेनायाम् सर्वत्रैव अनुशासनस्य आवश्यकता वर्तते।

ङ. लोके यदि अनुशासनं न स्यात् तर्हि सर्वदा अव्यवस्था भविष्यति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. अस्मिन् संसारे **अनुशासनस्य** महत्त्वं वर्तते।

ख. **विद्याध्ययनकाले** तु **अनुशासनस्य** साम्राज्यम् एव अस्ति।

ग. विद्यालये **गुरवः** अनुशासनं कुर्वन्ति।

घ. अनुशासनं **सामाजिक जीवने** परम् आवश्यकम्।

ङ. अनेनैव इहलोकस्य **कल्याणं** जायते।

**3. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | सर्वत्रैव | = | **सर्वत्र** | + | **एव** |
| ख. | राष्ट्रेऽपि | = | **राष्ट्रे** | + | **अपि** |
| ग. | विद्याध्ययनम् | = | **विद्या** | + | **अध्ययनम्** |
| घ. | श्रेयोऽभिलाषी | = | **श्रेयः** | + | **अभिलाषी** |
| ङ. | पुनश्च | = | **पुनः** | + | **च** |

**4. निम्नलिखितानां शब्दानां वाक्य-प्रयोगं कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | सर्वत्र | = | अनुशासनस्य **सर्वत्र** महत्वं वर्तते। |
| ख. | गुरवः | = | विद्यालये **गुरवः** अनुशासनं स्थापयन्ति। |
| ग. | अभ्यासः | = | बाल्यकालात् एव अनुशासनस्य **अभ्यासः** करणीयः। |
| घ. | यदि | = | जीवने **यदि** अनुशासनं भवति तर्हि मनुष्यः सफलतां लभते। |
| ङ. | कल्याणम् | = | अनुशासने एव मानवस्य **कल्याणम्** अस्ति। |

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अस्मिन् संसारे अनुशासनस्य सर्वत्र महत्त्वम् अस्ति।
ख. विद्यालये अनुशासनम् अति आवश्यकम् अस्ति।
ग. मानव जीवने अनुशासनस्य महत्तवम् अवलोक्यते।
घ. बाल्यकालात् एव अनुशासनस्य अभ्यास: कर्तव्य:।
ङ. सामाजिक जीवने अपि अनुशासनं परम् आवश्यकं वर्तते।

**6. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. मानव जीवन में अनुशासन का महत्त्व बहुत आवश्यक है।
ख. जो छात्र परिश्रम करते हैं, वे ही जीवन में सफल होते हैं।
ग. यदि अनुशासन न हो तो विद्यार्थी उद्‌दंड हो जाए।
घ. बचपन से ही अनुशासन का अभ्यास करना चाहिए।
ङ. इसी से इस लोक का कल्याण हो सकता है।

**7. निम्नलिखितानां पदानां वचनम्, लिङ्गं विभक्तिं च लिखत।**

**उत्तरम्–**

| | पदम् | | वचनम् | लिङ्गम् | विभक्तिः |
|---|---|---|---|---|---|
| क. | संसारे | = | **एकवचनम्** | **पुंल्लिङ्गम्** | **सप्तमी** |
| ख. | गुरो: | = | **एकवचनम्** | **पुंल्लिङ्गम्** | **पञ्चमीषष्ठी** |
| ग. | अनुशासनात् | = | **एकवचनम्** | **नपुंसकलिङ्गम्** | **पञ्चमी** |
| घ. | संस्कृते: | = | **एकवचनम्** | **स्त्रीलिङ्गम्** | **पञ्चमीषष्ठी** |

**8. निम्नलिखितानां पदानामर्थान् लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| वर्तते | = | **है** | कुर्वन्ति | = | **करते हैं।** |
| प्राप्नुवन्ति | = | **प्राप्त करते हैं।** | अवलोक्यते | = | **दिखाई देता है।** |
| कुरूत: | = | **( दो ) करते हैं।** | कुर्यु: | = | **करना चाहिए ( करें )।** |
| भवेयु | = | **होने चाहिए ( होंवे )** | पश्यन्ति | = | **देखते हैं।** |
| भविष्यति | = | **होगा।** | तिष्ठेयु | = | **रहने चाहिए ( रहें )** |
| तर्हि | = | **तो** | स्यात् | = | **होना चाहिए।** |

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 6 विचित्रं जगत्

## *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. वयं जन्तुशालायां जन्तूनां विचित्रतां प्रत्यक्षम् अनुभविष्याम:।
ख. जलजीवनविषये इदं ज्ञातुं वैज्ञानिकानाम् औत्सुक्यं वर्तते यत् ते कथं जलेषु निवसन्ति कथं च स्वसन्ततिं पालयन्ति।
ग. अस्मिन् संसारे मानवा:, मृगा:, कीटा:, खगा:, वृक्षा:, पादपा: च सर्वे

अन्योन्याश्रिता:।

घ. पादपानाम् वृक्षाणाम् कुसुमानां वैभवं वैचित्र्यं च दृष्टिपथम् आगमिष्यति।

ङ. भयावहा: सिंहा:, चित्रका: व्याघ्रा: च भयम् उत्पादयन्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. **विशालम्** इदं जगतम् **विचित्रं** च।

ख. मानवात् ऋते विविधा: **प्राणिनः** अत्र निवसान्ति।

ग. कचित् **उष्ण प्रदेशेषु** वसन्ति, केचित् शीतलस्थलेषु।

घ. **पृथिव्याः** भागद्वयं **जलम्** अस्ति।

ङ. रमणीया हि सृष्टि एषा **विलक्षणा** च।

**3. एकस्मिन् शब्दे उत्तरं ददत।**

**उत्तरम्–** क. रम्यम्। ख. प्राणिन:। ग. सौम्या:। घ. पृथिव्या:।

ङ. अद्भुतम्। च. रमणीया। छ. सन्ततिम्।

**4. सन्धि विच्छेदं कुरूत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | जन्तुशालां | = | **जन्तु** | + | **शालां** |
| ख. | ह्रस्वाकारा | = | **ह्रस्व** | + | **आकारा** |
| ग. | स्थलवासिन: | = | **स्थल** | + | **वासिनः** |
| घ. | निवासानुकूल | = | **निवास** | + | **अनुकूल** |
| ङ. | शीतलस्थलेषु | = | **शीतल** | + | **स्थलेषु** |
| च. | शोघकार्यं | = | **शोध** | + | **कार्यं** |
| छ. | घासक्षेत्रेषु | = | **घास** | + | **क्षेत्रेषु** |

**5. संस्कृते अनुवादं करुत।**

**उत्तरम्–** क. इदं जगत् विशालं विचित्रं च वर्तते।

ख. इयं विविधता इदं जगत् रम्यं करोति।

ग. जन्तूनां विचित्रतां प्रत्यक्षम् अनुभविष्यति।

घ. क्वचित् सौम्या: पक्षिण: कूजन्ति।

ङ. क्वचित् भयावहा: पशव: गर्जन्ति।

च. पृथिव्या भागद्वयं जलम् अस्ति।

छ. खलु एषा सृष्टि: रमणीया विचित्रा च अस्ति।

**6. निम्नलिखितानां पदानां वचनम् विभक्तिं च लिखत।**

**उत्तरम्–**

| **पदानां** | **विभक्तिं** | **वचनम्** |
|---|---|---|
| मानवात् | **पञ्चमी** | **एकवचनम्** |
| घासक्षेत्रेषु | **सप्तमी** | **बहुवचनम्** |
| वृक्षाणाम् | **षष्ठी** | **बहुवचनम्** |
| हिमप्रदेशेभ्य: | **चतुर्थी/पञ्चमी** | **बहुवचनम्** |

**7. शब्दार्थान् मेलयत।**

**उत्तरम्–** क. भवान् **(v) आप**

| | | | |
|---|---|---|---|
| ख. | क्वाचित् | (vi) | **कहीं** |
| ग. | प्रति | (iv) | **की ओर** |
| घ. | केचित् | (iii) | **कुछ** |
| ङ. | मकराः | (ii) | **मगरमच्छ** |
| च. | कदाचित् | (i) | **कभी** |

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 7 सुभाषितानि

## *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. दिवसे तथा करणीयं येन रात्रौ सुखेन तिष्ठेत् तथैव युवावस्थायां तादृशानि कार्याणि करणीयानि येन वृद्धत्वे सुखी भवेत्।

ख. परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनं च तादृशं मित्रं वर्जयेत।

ग. कार्याणि उद्यमेन सिध्यन्ति।

घ. विचक्षणाः वर्तमान काले वर्तयन्ति।

ङ. यत्र धनिकः श्रोत्रियो, राजा, नदी, वैद्यश्च न भवेयुः तत्र वासं न कारयेत्।

च. सर्पस्तु काले दशति परं दुर्जनः पदे पदे।

**2. निम्नलिखितान् श्लोकान् पूरयत।**

**उत्तरम्–** क. उद्यमेन **हि सिध्यन्ति कार्याणि न मनोरथैः**।
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे** मृगाः।।

ख. परोक्षे **कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्**।
**वर्जयेत्तादृशं मित्रं विषकुम्भं** पयोमुखम्।।

ग. गते **शोको न कर्तव्यो भविष्यं नैव** चिन्तयेत्।
**वर्तमानेन कालेन वर्तयन्ति** विचक्षणाः।।

**3. कोष्ठकेषु दत्तेषु पदेषु उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. मधुरं फलं परिश्रमेण मिलति।

ख. तत्र वासः न कार्यः यत्र पर्यावरणं दूषितं भवेत्।

ग. परोक्षे निन्दकं मित्रं वर्जयेत्।

घ. सर्वेषु पक्षिषु गृद्धः क्रूरः भवति।

ङ. कार्याणि दिवसे एवं पूरणीयानि।

**4. निम्नलिखितानि क्रियापदानि प्रयुज्य वाक्यानि रचयत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | चलति | = | गजः शनैः शनैः **चलति**। |
| ख. | वसेत् | = | यत्र सज्जनाः न भवेयुः तत्र न **वसेत्**। |
| ग. | वर्तयन्ति | = | सज्जनाः सर्वैः सह सुमधुरं **व७र्तयन्ति**। |
| घ. | कुर्यात् | = | कदापि असत्यभाषणां न **कुर्यात्**। |

ङ. दशति = सर्पः कालेन **दशति** परं खलः पदे पदे।

**5. निम्नलिखितानां मेलनं कुरुत।**

**उत्तरम्–** क. सुप्तस्य **(vi) सिंहस्य**

ख. वृद्धः **(vii) सुखी भवेत्**

ग. सर्पः **(v) दशति कालेन**

घ. वर्तयन्ति **(ii) विचक्षणाः**

ङ. गते **(iii) शोको न कर्त्तव्यः**

च. उद्यमेन **(i) हि सिध्यन्ति**

छ. क्रूरतरः **(iv) खलः**

**6. रञ्जितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

**उत्तरम्–** क. मृगाः कुत्र न प्रविशन्ति? ख. यत्र न कः तत्र वासं न कारयेत्?

ग. कार्याणि कथं न सिध्यन्ति? घ. कदा शोको न कर्तव्यः?

ङ. दुर्जनः कदा दशति?

**7. निम्नलिखितानां शब्दानां समानार्थकान् शब्दान् लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| दिवसः | = | **वासरः** | रात्रिः | = | **निशा** |
| उद्यमः | = | **परिश्रमः** | मृगः | = | **पशुः** |
| राजा | = | **नृपः** | दुर्जनः | = | **खलः** |

**8. निम्नलिखितानां श्लोकान् हिन्द्यामनुवादं कुरूत।**

**उत्तरम्– हिंदी अनुवाद–**

क. परिश्रम से ही कार्य पूरे होते हैं इच्छाओं से नहीं। क्योंकि सोए हुए शेर के मुँह में पशु स्वयं प्रवेश नहीं करते हैं, उसे भी परिश्रम करना ही पड़ता है।

ख. पीठ पीछे कार्य को नष्ट करने वाले और सामने प्रिय (मीठा) बोलने वाले ऐसे मित्र को उसी प्रकार से छोड़ देना चाहिए जिस प्रकार से मुख पर दूध लगे हुए विष से भरे घड़े को छोड़ दिया जाता है।

**क्रियाकलापः**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 8 कन्याकुमारीतः पत्रम्

## *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. प्रज्ञा एतत् पत्रं कन्याकुमारीतः लिखति।

ख. भारतस्य पूर्वस्यां दिशि बङ्गोपसागरः अस्ति।

ग. प्रख्यातः राष्ट्रभक्तः युवा संन्यासी स्वामी विवेकानन्दः आसीत्।

घ. विवेकानन्दः मातृभूमेः सेवायै आत्मानं समर्पयितुं सङ्कल्पितवान्।

ङ. अपरस्मिन् शिलाखण्डे तिरुवल्लुवरस्य तमिलकवेः प्रतिमा अस्ति।

**2. निर्देशानुसार उचितेभ्यः शब्देभ्यः रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. मम मित्रेण अनेकानि पुस्तकानि **क्रेतव्यानि**।

ख. सर्वे गुरुजना: **सेवनीया:**।

ग. अस्माभि: कक्षायां न **हसितव्यम्**।

घ. मया संस्कृतस्य विषये एका रचना **पठनीया**।

ङ. सर्वदा शुद्धं जलं **पातव्यम्**।

च. वर्षासमये गृहे **स्थातव्यम्**।

**3. सम्यक् उत्तरे ( ✓ ) इति चिन्हं नियोजयत।**

**उत्तरम्–** क. चरणम्, ख. विवेकानन्दशिला, ग. अरबसागरे,

घ. तिरुवल्लुवरस्य, ङ. ध्यानम्।

**4. असम्बद्धान् शब्दान् अवगम्य असम्बद्धताया कारणं च ज्ञापयत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | कुत्र | — | स्थानवाचक, शेष सभी कालवाचक |
| ख. | पाठयति | — | प्रेरणार्थक क्रिया, शेष सभी सामान्य क्रिया |
| ग. | समुद्र | — | पुंल्लिङ्ग संज्ञावाची, शेष सभी नपुंसकलिङ्ग वाची |
| घ. | धनवान् | — | संज्ञावाची, शेष सभी क्रियावाची |
| ङ. | आगन्तुम | — | तुमुन् प्रत्यय युक्त, शेष सभी 'क्त्वा' प्रत्यय युक्त |

**5. क्रियापदानाम् अर्थं लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| प्रणमामि | = | **प्रणाम करता हूँ** | निवेदयामि | = | **निवेदन करता हूँ** |
| लिखामि | = | **लिखता हूँ** | मन्यते | = | **माना जाता है** |
| कथ्यते | = | **कहलाता है।** | गच्छन्ति | = | **जाते हैं।** |
| भवाति | = | **होता है** | अवलोकितवन्त: | = | **देखा** |
| कृतवान | = | **किया** | चिन्तयामि | = | **सोच रहा हूँ** |
| प्रस्थास्याम: | = | **प्रस्थान करेंगे** | दर्शयिष्यामि | = | **दिखाऊँगा** |

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अहं कनयाकुमायित: पत्रं लिखमि।

ख. तस्मिन् मन्दिरे कुमारीदेव्या: एका प्रतिमा अस्ति।

ग. विविधेभ्य: स्थानेभ्य: तीर्थयात्रिण: अत्रायान्ति।

घ. अस्यां शिलायाम् उपविश्य विवेकानन्द: ध्यानमकरोत्।

ङ. वयम् अस्मात् श्व: प्रस्थानं करिष्याम:।

च. अस्माभि: विवेकानन्दस्य साहित्यं पठितव्यम्।

छ. पर्यटनाय वयं तत्र गमिष्याम:।

ज. वयं ग्रीष्मावकाशे कन्याकुमारीं चलेम।

**7. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. हिमालय भारत की रक्षा करता है।

ख. स्वामी विवेकानंद ने कन्याकुमारी में तपस्या की।

ग. पूर्णिमा में वहाँ का दृश्य बहुत सुंदर होता है।

घ. मैं पिता जी के साथ यहाँ घूमने आई हूँ।

ङ. यह स्थान मेरे घर से अधिक दूर नहीं है।

**8. निम्नलिखितानां शब्दानां स्व-वाक्येषु प्रयोगं कुरूत।**

**उत्तरम्–** क. कन्या कुमारी = **कन्याकुमारी** भारतमातु: पवित्रं चरणं मन्यते।

ख. छात्रै: = स: **छात्रै** सह नदीतटं अगच्छत्।

ग. त्रयाणाम = कन्याकुमार्याम् हिन्दमहासागर:, बङ्गोपसागर: अरब सागरश्च त्रयाणाम् समुद्राणाम्।

घ. एकस्मिन् = **एकस्मिन्** वने एक: सिंह: वसति स्म।

ङ. सूर्यास्तम् = सायम् पश्चिमदिशि **सूर्यास्तं** भवति।

च. पूर्णिमा = **पूर्णिमा** तिथौ पूर्णचन्द्रस्य दर्शनं भवति।

**क्रियाकलाप:**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 9 मुनिः मूषकश्च

### *अनुशीलनम्*

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मुनि: वने स्वाश्रमे तप: करोति स्म।

ख. मुनि: मूषकस्य चिकित्सा कृत्वा पालनमकरोत्।

ग. मुनि: बिडालं कुक्कुरे अत: परिवर्तितवान् यतोहि स: कुक्कुरात् भीत्वा मुने: समीपम् अधावत्।

घ. व्याघ्र: अचिन्तयत् यत् यावत् अयं मुनि: जीवति तावत् सर्वे जना: मम विषये एवमेव वदिष्यन्ति। एतेन मम अपकीर्ति: भवति। मुने: कारणात् जना: मम मूलं रूपं स्मरन्ति। यदि अहं मुनिं खादामि तर्हि कोऽपि मम मूलरूपं न बोधिष्यति।

ङ. मुनि: व्याघ्रस्य भावं ज्ञात्वा 'पुनर्मूषको भव' इति शापं दत्तवान्। परिणामत: व्याघ्र: पुन: मूषकरूपेण परिवर्तित:।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. स: वने **स्वाश्रमं** निर्माय तप: करोति स्म।

ख. मुनि: **मूषकं** बिडालमकरोत्।

ग. इदानीं स: **कुक्कुर:** निर्भयेन यत्र तत्र भ्रमति स्म।

घ. मुनि: पुन: **मूषकोभव** इति शापं दत्तवान्।

ङ. व्याघ्र: पुन: **मूषकरूपेण** परिवर्तित:।

**3. निम्नलिखितानां पदानां कारकाणि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| वने | = | **अधिकरण कारकम्** | काकस्य | = | **संबंध भावम्** |
| मुखात् | = | **अपादान कारकम्** | मूषकं | = | **कर्म कारकम्** |
| बिडालस्य | = | **संबंध भावम्** | आशीर्वादेन | = | **करण कारकम्** |
| मम | = | **संबंध भावम्** | | | |
| मुने: | = | **अपादान कारकम/संबंध भावाम्** | | | |

**4. निम्नलिखितानां शब्दानां वाक्यप्रयोगं कुरुत।**

**उत्तरम्–** क. निर्माय = वृक्षशाखायां चटका गृहं **निर्माय** वसति।

ख. कृत्वा = एतत् कार्यं पूर्णं **कृत्वा** एव भोजनं करणीयम्।

ग. विज्ञाय = सर्वं वृत्तान्तं **विज्ञाय** श्रीकृष्ण: हस्तिनापुरं प्रति प्राचलत्।

